॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૧૩. ત્રયોદષઃ સર્ગઃ
પૃથુદર્શનમુત્થિતં કૃતાર્થં પૃથિવીભૃત્પ્રણતિં ગૃહીતવંતમ ।
નિજશિષ્યમુદેઽથ સહ્યમાપ્તં પુરુષઃ કશ્ચિદુપાયયૌ કદાચિત ॥ ૧૩.૧ ॥

ભગવાનિહ નઃ સ્વકિંકરાણાં અચિરેણાઽવ્રજતાદનુગ્રહાય ।
ઈતિ કાર્યચિકીર્ષયાઽઽર્થયત ત્વાં નૃપ ઈત્યભ્યધિતૈષ તં પ્રણમ્ય ॥ ૧૩.૨
॥

અથ માઘવતીમપાસ્ય કાષ્ઠાં વ્રજતા પ્રૈધિતતેજસા પ્રતીચીમ ।
પરિશોધયતા સ્વપાદસંગાત પૃથિવીં પ્રાજ્ઞદિવાકરેણ રેજે ॥ ૧૩.૩ ॥

અશુભાનપહાય માયિજુષ્ટાન અધમાદ્રીનિવ ગોત્રનિમ્નગૌઘૈઃ ।
સુજનૈસ્તરસાઽભિગમ્યમાનઃ પરમસ્નેહતયા ક્રમપ્રસન્નૈઃ ॥ ૧૩.૪ ॥

સુમનઃફલશોભિનોઽત્ર પુંસો નમયન ગોભિરનોકહાનિવોચ્ચાન ।
અપિ ભંગમુપાનયન્નનમ્રાન દૃઢભાવાદપરાનવાર્યવીર્યઃ ॥ ૧૩.૫ ॥

ગમનોત્સવવિસ્મિતૈર્નિષેવ્યો વિવિધૈર્જનપદૈર્જનૈરજસ્રમ ।
પરિસૃત્વરકીર્તિરાર્તિમુક્ત્યૈ પુરુષૈર્દૂરભુવશ્ચ ગમ્યમાનઃ ॥ ૧૩.૬ ॥

અમરૈરમરાનુગૈર્મુનીદ્રૈઃ અપરેક્ષાવિષયૈશ્ચ સેવ્યમાનઃ ।
હરિપાદસરોજસંગસારો ભુવને પાવનપાવનો નિકામમ ॥ ૧૩.૭ ॥

અયમપ્રતિવારણઃ પ્રયાણે પરમાનંદસુતીર્થસૂરિરાજઃ ।
વિબભાવતિવેલમચ્ચરૂપઃ સુરસિંધોરિવ સંતતપ્રવાહ ઃ ॥ ૧૩.૮ ॥

સમયેન ગતોઽમહીયસાઽસૌ વિષયં સ્તંભપદોપસર્જનાખ્યમ ।
મદનાધિપતેઃ સુધામ ધામ પ્રવિવેશાખિલલોકવંદનીયમ ॥ ૧૩.૯ ॥

ક્ષણદામિહ તાવદૂષિવાંસં વિહિતાહર્મુખયોગ્યયોગમેનમ ।
ગમનોદ્યમલક્ષણૈરજાનન ગમનાયોદ્યતમાશુ શિષ્યસંઘાઃ ॥ ૧૩.૧૦ ॥

પુરતો વિસૃતાઃ સમાધિશુદ્ધ્યૈ યતયસ્તત્ર પટીઃ કષાયવેષાઃ ।
સહસોદહરન સ્વયોગ્યમુદ્રાયુતદંડાદિકધારણોદ્યમેન ॥ ૧૩.૧૧ ॥

અવધાર્ય વિશેષકારિશંખપ્રકટાંકાન સુધિયા ગતાર્દ્રભાવાન ।
લસિતા તુળસીસ્રગસ્ય કંઠે હરિનિર્માલ્યતયોચિતા ન્યધાયિ ॥ ૧૩.૧૨ ॥

યતધીર્ગુરુચક્રિમૂર્તિપૂર્ણં યતનિશ્વાસવચા વિશોધ્ય પાણી ।
ગુણકુંડલમંડિતં વિમાનં ગુણબંધં કવચાવૃતં બભાર ॥ ૧૩.૧૩ ॥

સકમંડલુમંડલાવલંબં સ્વયમેવાલઘુપુસ્તકાદિભારમ ।
યુવશિષ્યગણો દધે નયત્નાત હિ દાક્ષ્યસ્ય ગુણોઽપરોઽસ્તિ ॥ ૧૩.૧૪ ॥

અતિસંભ્રમતઃ પરિભ્રમંતં ભરદામાનવલોકિનં ચિરાય ।
અનુયોગપરં મુહુઃ પ્રમત્તં જહસુર્નૂતનશિષ્યમત્ર કેચિત ॥ ૧૩.૧૫ ॥

અથ તત્ક્ષણઘટ્ટિતોરુઘંટાઘનનાદવ્યપદેશતઃ પરેણ ।
અમિતપ્રમતિઃ પ્રચોદિતોઽસૌ ઈતિ નિર્યત્સુ નિજેષુ નિર્જગામ ॥ ૧૩.૧૬ ॥

ધૃતમાતપવારણં વરેણ્યં વ્રતિરાજં તમુપર્યુપર્યુદારમ ।
ઉદયન્મિહિરોપરિષ્ઠપૂર્ણદ્વિજરાજશ્રિયમાયયાવભૂતામ ॥ ૧૩.૧૭ ॥

ભુવનત્રયધારિણં મુકુંદં દધદંતઃ સ દધે ગુરુઃ સ્વયં ચ ।
અપિ કેનચિદિત્યદો ન ચિત્રં નનુ સ પ્રાણપતિર્બભાર તં ચ ॥ ૧૩.૧૮ ॥

યતયો ગૃહિણોઽથ વર્ણિમુખ્યાઃ શ્રુતિગાસ્ત્યકતનિષિદ્ધકામ્યભાવાઃ ।
ઈહ મૂર્તિધરા ઈવ સ્વધર્માઃ શતસંખ્યાઃ શતસંખ્યમન્વગચ્યન ॥ ૧૩.૧૯
॥

પરિવારજના ન માર્ગદુઃખં પ્રયયુઃ પૂરુષરત્નમીક્ષમાણાઃ ।
ઈતિ નાદ્ભુતમસ્ય હિ પ્રયાંતિ સ્મૃતિમાત્રાદ ભવિનો ભવાપવર્ગમ ॥ ૧૩.૨૦
॥

મદનેશ્વરવલ્લભપ્રદેશે પ્રભુમાયાંતમથાભ્યપદ્યત દ્રાક ।
જયસિંહ ઈમં નૃસિંહવર્યઃ શુભધીઃ સ્તંભવિશિષ્ટસિંહનામા ॥ ૧૩.૨૧ ॥

અવતીર્ય પુરૈવ વાહનાત સ્વાદ અપિ માર્ગાદપસાર્ય સૈનિકાન સઃ ।
સહ કૈશ્ચન ભૂસુરૈરવાપ્તઃ ત્રિજગત્પૂજ્યપદાંતિકે નનામ ॥ ૧૩.૨૨ ॥

પૃથિવીપતિનાઽનુગમ્યમાનો વિનયાદ ભક્તિરસાર્દ્રમાનસેન ।
અચિરેણ સ વિષ્ણુમંગલસ્ય પ્રયયાવાયતનોત્તમસ્ય પાર્શ્વમ ॥ ૧૩.૨૩ ॥

નરદેવદિદૃક્ષયા સમેતા ઉભયગ્રામજના જનાઃ પરે ચ ।
ઉપયાંતમનંતમાનસં તં મુહુરૈક્ષંત કુતૂહલાબ્ધિમગ્નાઃ ॥ ૧૩.૨૪ ॥

પુરતો મધુરસ્વનૈર્વદદ્ભિઃ સ્વકૃતાઃ કર્ણસુખા મુકુંદગાથાઃ ।
ધૃતપંકજબીજચક્રચિહ્નૈઃ કૃત નૃત્તૈશ્ચતુરૈર્નિષેવ્યમાણમ ॥ ૧૩.૨૫ ॥

કલિતાંજલિના સ્ફુટાનુયાતં જનસંબાધસહેન ભૂમિભર્ત્રા ।
કરુણાવિષયં ચિકીર્ષુણા સ્વં વ્રજતા કિંકરતામકૈતવેન ॥ ૧૩.૨૬ ॥

ઈદમિત્થમિતીક્ષણૈર્નરાણાં અપરિચ્છેદ્યમહિષ્ઠધામરૂપમ ।
અધિકં ધરણીમલં ચિકીર્ષું સ્ફુટમુદ્યંતમિવ દ્યુનાથમન્યમ ॥ ૧૩.૨૭ ॥

અશનૈઃ શનકૈરિવાઽવ્રજંતં યુવસિંહપ્રવરપ્રગલ્ભયાનમ ।
અતિપાટલપાદપલ્લવાભ્યાં અવનીં પાવનતામલં નયંતમ ॥ ૧૩.૨૮ ॥

નખનિર્જિતપદ્મરાગરાગં વરકૂર્મપ્રપદં નિગૂઢગુલ્ફમ ।

સુરવર્યકરાગ્રસેવ્યજંઘં દ્વિરદોદારકરોપમોરુયુગ્મમ ॥ ૧૩.૨૯ ॥

શુભશુદ્ધનિતંબબિંબરાજન્નવકૌશેયવિશેષબાહ્યવસ્ત્રમ ।
તનુકુક્ષિગળાળિકેષુ રેખાત્રિતયેન પ્રકટેન શોભમાનમ ॥ ૧૩.૩૦ ॥

મૃદુસૂક્ષ્મઘનારુણાવિકાચ્છપ્રકટપ્રાવરણેન ભાસમાનમ ।
અતિનૂતનતિગ્મભાનુભાસાં નિકરેણેવ સુવર્ણસાનુમંતમ ॥ ૧૩.૩૧ ॥

પૃથુવક્ષસમુન્નતાંસભિત્તિં ગુરુવૃત્તાયતહૃદ્યબાહુદંડમ ।
પરમારુણપાણિપલ્લવાંતઃ સ્ફુરિતોર્ધ્વધ્વજલાંછનાદિમંતમ ॥ ૧૩.૩૨ ॥

પરિપૂર્ણશશાંકબિંબશંકાવિષયં પ્રાક સહસાऽવલોકનેન ।
અકળંકતયા પરં વિવિક્તં વદનં બિભ્રતમચ્છવિભ્રમાબ્ધિમ ॥ ૧૩.૩૩ ॥

અતિસુંદરમંદહાસરાજન્નવકુંદાભરદં શુભારુણોષ્ઠમ ।
કમળાયતલોચનાવલોકૈઃ અપિ લોકાન સકલાન પ્રહર્ષયંતમ ॥ ૧૩.૩૪ ॥

અતિભાસુરકર્ણભાસિતશ્રીતુળસીગુચ્છમતુચ્છકાંતિગંડમ ।
ભુવનત્રયભૂત્યભૂતિદાને ચતુરભ્રૂવરવિભ્રમં સુમૌલિમ ॥ ૧૩.૩૫ ॥

સકલાવયવાન સ્ફુટં મિમાનાઃ પ્રતિમાલક્ષણલક્ષણાય લક્ષ્યમ ।
ચતુરા વિદધુર્યદીયગાત્રં સ સુલક્ષ્મેત્યધુના નિગદ્યતે નો ॥ ૧૩.૩૬ ॥

અતિલોલદૃશાં સમીક્ષિતું સ્વં જનસંબાધભયેન દૂરભાજામ ।
સમદર્શયદૂર્ધ્વમોરસોઽસૌ દયયૈવોરુજનૌઘમધ્યગોઽપિ ॥ ૧૩.૩૭ ॥

સવિકાસદૃશાં કૃતાંજલીનાં જનતાનાં પરમાદરાન્નતાનામ ।
વલયેન વૃતઃ પ્રિયં મુરારેઃ પ્રવિવેશાઽયતનં પ્રબર્હબોધઃ ॥ ૧૩.૩૮ ॥

વિવિધપ્રભુમધ્યસન્નિષણ્ણો નરદેવેન સમં સ ગૂઢદેવઃ ।
વિબભાવુડુરાડિવોડુમધ્યે સહ મહ્યાસ્તનયેન પૂર્ણબિંબઃ ॥ ૧૩.૩૯ ॥

અવદત સ કથાં રથાંગપાણેઃ ભગવાન ભાગવતે ભવાપ હંત્રીમ ।
અનુકૂલગુણસ્વરાદિભાજા નિજશિષ્યપ્રવરેણ વાચ્યમાને ॥ ૧૩.૪૦ ॥

કથનં તદુદારધૈર્યસારં મધુરં પુષ્કલભાવવત પ્રસન્નમ।
વિદુષોઽવિદુષોઽપિ શૃણ્વતોઽલં વ્યધિતાઽનંદરસાંબુધૌ નિમગ્નાન ॥
૧૩.૪૧ ॥

ગમનાસનસંકથાદિલીલાઃ સ્મૃતિમાત્રેણ ભવાપવર્ગદાત્રીઃ ।
કથમપ્યમરાઃ પ્રપંચયેયુઃ નનુ મધ્વસ્ય ન માદૃશોઽલ્પબોધાઃ ॥ ૧૩.૪૨ ॥

સુતપઃકવિતાદિસદ્ગુણાનાં લિકુચાનાં કુલજોઽ઼ગિરોન્વયાનામ ।
અભવદ ગુહનામકો વિપશ્ચિત કવિવર્યોઽખિલવાદિવંદનીયઃ ॥ ૧૩.૪૩ ॥

દયિતાઽસ્ય સતી ગુણાનુરૂપા વિધિવીર્યેણ મુહુર્મૃતપ્રજાઽપિ ।

અભજદ્ભુવનપ્રભૂ હરીશૌ સુતકામા વસુદેવસૂનુભક્તા ॥ ૧૩.૪૪ ॥

પરમેશ્વરયોઃ પ્રસાદયોગાત સુતરત્નં તદસૂત સૂરિપત્ની ।
પરિષત્પદપટ્ટનેષુ નાર્ઘો વિવિદે યસ્ય સમઃ પરીક્ષકાગ્ર્યૈઃ ॥ ૧૩.૪૫ ॥

વદનેંદુમવેક્ષ્ય નંદનસ્ય સ્વકુલોત્તારણદક્ષલક્ષણસ્ય ।
કૃતકૃત્યતયા ક્રિયાઃ પ્રકુર્વન કવિરાખ્યાદુચિતાં ત્રિવિક્રમાખ્યામ ॥ ૧૩.૪૬ ॥

કળભાષણ એવ સૂરિપોતઃ કવિરાસીદનવદ્યપદ્યવાદી ।
અવભાતિ નનુ પ્રભાપ્રભાવી ભગવાન બાલતરોઽપિ તિગ્મભાનુઃ ॥
૧૩.૪૭ ॥

સકલાંગચુતાવભાતશાખઃ સમયે પ્રાપ્ત ઉદારપક્ષિસેવ્યઃ ।
સ સસર્જ સદધ્વગોપકૃત્યૈ લિકુચઃ કાવ્યફલં રસાભિરામમ ॥ ૧૩.૪૮ ॥

પ્રતિપાદિતમાત્મના યથાર્થં પૃથુમાયાસમયસ્ય દુર્ઘટત્વમ ।
સ્વગુરૌ પરિહર્તુમક્ષમેઽપિ શ્રુતવાંસ્તં સ વયસ્યબોધિતોઽલમ ॥ ૧૩.૪૯ ॥

ભગવત્યુદિતે સગોવિલાસે વટુભાવં ત્યજતિ ત્રિવિક્રમાખ્યે ।
અપિ ભાનુપુરસ્સરાઃ સમસ્તાઃ પ્રચયુઃ કીટમણિપ્રભત્વમાષુ ॥ ૧૩.૫૦ ॥

અતિદક્ષમતિં સપાદલક્ષે સમયે માચિજનસ્ય યુક્તિશૂરમ ।
મહિતં હિ મહીતળે મહિમ્ના જનકો નંદનમબ્રવીદુપાંશુ ॥ ૧૩.૫૧ ॥

શૃણુ વાચમિમાં વિચારિતાર્થાં ન કલૌ નિર્ગુણભાવના સુખાય ।
ઈતિ ગૌણવિમુકતયે ગુણાઢ્યં ભજ દેવં વસુદેવસૂનુમેવ ॥ ૧૩.૫૨ ॥

ઈતિ તાતવચો નિશમ્ય કિંચિત તરળાત્માઽપિ વિચાર્ય શાસ્ત્રસારમ।
પરમેવ સ પારમારુરુક્ષુઃ વિગુણોઽપાસ્તિમુપાશૃણોત પરેભ્યઃ ॥ ૧૩.૫૩
॥

નિજધર્મરતો ગૃહિપ્રબર્હઃ કલિકાલાકુલિતાંતરોઽપિ હંત ।
નિતરાં નિષિતાત્મના નિસર્ગાત સ્ફુટમાલોચયદિત્યસૌ કદાચિત ॥ ૧૩.૫૪
॥

રચિતં નનુ સૂત્રમત્ર માનં વિદુષા સત્યવતીસુતેન સાક્ષાત ।
અપરસ્પરસંગતાનિ ભાષ્યાણ્યપિ સર્વાણિ ન માનતાં વ્રજેયુઃ ॥ ૧૩.૫૫
॥

યદિ તેષુ નિરાગ્રહાંતરાઃ સ્મઃ સુઘટં નોપલભામહે હિ કિંચિત ।
ન તથાઽપિ પરંપરોપયાતં ન પઠામઃ પ્રણયેન શાંકરીયમ ॥ ૧૩.૫૬ ॥

ઘટનોપનિષત્સુ નાલ્પબુદ્ધેઃ સુઘટેત્યભ્યુપગમ્ય ચિંતયામઃ ।
ન વિમુક્તિમુપૈતિ કોઽપિ મુક્ત્વા સમયોક્તામિહ યામિમામુપાસ્તિમ ॥
૧૩.૫૭ ॥

વિતતઃ સુખસચ્ચિદદ્વયાત્મા સમુપાસ્યો વિહિતો હિ તત્ત્વવિદ્ભિઃ ।
સ ચ નાવયવી નિરૂપ્યતે યેદ દ્યુતિમાત્રં ચ ન હીત્યદો રહસ્યમ ॥ ૧૩.૫૮ ॥

યદિ ચેદૃગુપાસ્યતેऽસ્ય રૂપં તિમિરત્વેન વિભાતિ પારિશેષ્યાત ।
ફલમપ્યથ મુક્તિરીદૃશી સ્યાદ ઈતિ નો નૈવ ધિનોત્યુપાસ્તિરેષા ॥ ૧૩.૫૯ ॥

અથ વેદપુરાણભારતાનિ સ્વયમાલોચ્ય યથાવબોધમત્ર ।
ગુણવંતમુપાસ્મહે મુકુંદં સ્મૃતિધર્માન સ્ફુટમાચરંત એવ ।૧૩.૬૦ ॥

અવધાર્ય યદેતિકાર્યમાર્યઃ સ વિવેકાદુપચક્રમે વિધાતુમ।
પરિપૂર્ણમતેર્જગત્સુ કીર્તિં પરિપૂર્ણામશૃણોત તદા વિશુદ્ધામ ॥ ૧૩.૬૧ ॥

વિહિનસ્તિ હિ નો જનોऽતિવાગ્મી સમયં કોऽપિ પરંપરોપયાતમ ।
ક્ષિપ તં ત્વમુદારયુક્તિશૂરો ન પરે તત્ર સમર્થતાં વ્રજેયુઃ ॥ ૧૩.૬૨ ॥

તવ વેદનદીર્વિગાહ્ય ભૂયઃ સમયાંભોધિષુ કુર્વતો વિહારમ ।
નવકાવ્યરસપ્રિયસ્ય વાદિદ્વિરદેંદ્ર પ્રતિવારણો ન જજ્ઞે ॥ ૧૩.૬૩ ॥

ઉપયાહિ યશઃ શશાંકગૌરં નિજયૂથસ્ય ભયં નિરાકુરુ ત્વમ ।
અધુના વિધિનોપપાદિતં તં પ્રતિવાદિપ્રતિવારણં નિવાર્ય ॥ ૧૩.૬૪ ॥

ઈતિ માયિજનેન તત્રતત્ર સ્વજનત્વેન સ તાવદર્થ્યમાનઃ ।
અનુકૂલવચા મહિષ્ઠમાનો મનસા સંશયમાપ સંશયચ્છિત ॥ ૧૩.૬૫ ॥

શિતમધ્વવચઃ સૃણિપ્રયોક્તૃન પુરુષાનેષ વિષાદયન કવીભઃ ।
વિવિધોત્તરધૂળિપાતનેન પ્રતિઘેનાધિકમંધયાંચકાર ॥ ૧૩.૬૬ ॥

ક્ષણદાસુ વિચક્ષણઃ સ વીક્ષ્ય પ્રચુરપ્રજ્ઞમનોજ્ઞશાસ્ત્રસારમ ।
અપરાવિદિતઃ પ્રસાદગર્ભં વિદધે વિસ્મયમાંતરં મહાંતમ ॥ ૧૩.૬૭ ॥

વિદિતવાન વ્યવહૃત્ય સુદર્શનં બહળબોધમવેક્ષ્ય સ નિશ્ચયાત ।
અપિ ન તસ્ય મતં સહસાઽઽદદે નનુ વિમૃશ્ય કૃતી કુરુતેઽખિલમ ॥
૧૩.૬૮ ॥

તં વિશ્ણુમંગલગતં બહળપ્રબોધં પ્રાપ્યાભ્યવંદત તદાઽયુગવિક્રમાર્યઃ।
આનંદદં સ ચતુરાનનહાસલક્ષ્મ્યા તત્ત્વં પ્રવેત્તુમમરેંદ્ર ઈવાબ્જયોનિમ ॥
૧૩.૬૯ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે ત્રયોદશઃ સર્ગઃ ॥